International Journal of Sanskrit Research 2019; 5(4): 05-06

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2019; 5(4): 05-06
© 2019 IJSR
www.anantaajournal.com
Received: 07-05-2019
Accepted: 09-06-2019

**डॉ. तीर्थानन्द मिश्र**
एसोसियेट प्रोफेसर, संस्कृत विभाग
राजकीय मीरा कन्या महाविद्यालय,
उदयपुर, राजस्थान, भारत

**Correspondence**
**डॉ. तीर्थानन्द मिश्र**
एसोसियेट प्रोफेसर, संस्कृत विभाग
राजकीय मीरा कन्या महाविद्यालय,
उदयपुर, राजस्थान, भारत

# आस्तिकदर्शनानां स्वरूपविमर्शः

**डॉ. तीर्थानन्द मिश्र**

**प्रस्तावना**

अस्मिन् खलु संसारे नैके प्राणिनो जीवन्ति। तेषु मनुष्य एव स्वकीयोद्देश्यं धर्मेण साधयति। अन्ये सर्वे प्रणिनो जीवनं कथमपि यापयन्ति। ते तु न जानन्ति यज्जीवनस्य फलं लक्ष्य०च किमिति? तस्मात् तयोर्बोधाय दर्शनमुत्पन्नमिति। दृश्यतेऽनेनेति करण–व्युत्पत्या दृशिर् प्रेक्षणे धातोः ल्युट् प्रत्यये कृते दर्शन–शब्दो निष्पद्यते। तत्र किं दर्शनमिति भूयोऽपि जिज्ञासायां सत्यां आत्मा वाऽरे द्रष्टव्यः[1] – इति मन्त्रानुसारेण सर्वे वैदिकदार्शनिका आत्मानमुद्दिश्य तस्यानुसन्धानं तत्त्वज्ञानाय कृतवन्तः।

भारतीयदर्शनानि स्थूलरूपेण द्विधा विभज्यन्ते – आस्तिकदर्शनानि, नास्तिक– दर्शनानि च। भारतवर्षे सर्वे दार्शनिका वेदान् पुरूस्कृत्य तिरस्कृत्य वा स्वमतं प्रतिष्ठापितवन्तः। 'नास्तिको वेदनिन्दकः' इति मनुवचनानुसारं यानि दर्शनानि वेदानां प्रामाण्यं नैव स्वीकुर्वन्ति तानि नास्तिकानि, यानि च वेदानां प्रामाण्यमङ्गीकुर्वन्ति तानि आस्तिकदर्शनानीति कथ्यन्ते। तत्र चार्वाकाः जैनाः बौद्धाश्च वेदानां प्रामाण्यं नोरीकुर्वन्ति अतएव चार्वाकजैनबौद्धदर्शनानि च नास्तिकदर्शनानि निर्दिश्यन्ते। न्याय–वैरोषिक–सांख्ययोगमीमांसावेदान्ताख्यानि षडदर्शनानि आस्तिकदर्शनानि अभिधीयन्ते।

सर्वेषु आस्तिकदर्शनेषु सर्वत्र सामान्यतया अनुबन्धचतुष्टयमस्ति तत्र तत्वबुभुत्सुरधिकारी, मुक्तिरेव प्रयोजनम्, जीवब्रह्मप्रप०चानां सम्यक् ज्ञानमेव विषयः प्रतिपाद्यप्रतिपादकभावस्तु सम्बन्धः। विषयेऽस्मिन् मनुना सुष्ठूक्तम् –

> वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्।
> आचाराश्चैव साधूनामात्मनस्तुष्टिरेव च।।[2]

अत्रत्यविदुषामयं परिस्फुटो विचारः यन्मानवः पुरूषार्थमयजीवनं साधयेत्। धर्मार्थकाममोक्षाख्याः पुरूषार्थाः चत्वारः। धर्मादिप्रतिपादका ग्रन्था धर्मशास्त्रे मनुस्मृत्यादयः। अर्थशास्त्रे विष्णुगुप्तचाणक्यस्यार्थशास्त्रम् कामशास्त्रे वात्स्यायनस्य कामसूत्रम् मोक्षशास्त्रे उपनिषद् भगवद्गीता, ब्रह्मसूत्राणि च सन्ति। उक्त०चं

> धर्ममूलः सदैवार्थः कामोऽर्थफलमुच्यते।
> मूलमेतत् त्रिवर्गस्य निवृत्तिर्मोक्ष उच्यते।।[3]

वेदानुक्तमतानि परलोकसिद्धान्तसमन्वितानि च आस्तिकदर्शनानि षट्संख्यकानि। षड्दर्शनपरम्परायां न्यायदर्शनं प्रमुखम्। महर्षिगौतमः न्यायस्यादिप्रणेता। न्यायदर्शने प्रमाणप्रेमेयादिषोडशपदार्थानां चित्रणं वर्तते। नैयायिकास्तु प्रमाणचतुष्टयं मन्यन्ते। निःश्रेयसं मुक्तिरेव प्रयोजनमिति तच्छास्त्रे। दर्शनस्यास्य मान्यता यत् दुःखत्रयपाशवद्धो जीवात्मा प्रमाणप्रेमेयादिषोडशपदार्थानां तत्त्वज्ञानात् मोक्षं प्राप्नोति।

दर्शनेऽस्मिन् प्रमाणानां विवेचनं विशेषतया विहितम्। तत्र प्रत्यक्षानुमानोपमानशब्दा इत्येतानि चत्वारि प्रमाणानि स्वीकृतानि। प्रमाणैरर्थपरीक्षणं न्यायः 'इति व्याहरता भाष्यकारेण वात्स्यायनेन न्यायनये प्रमाणमहात्म्यमङ्गीकृतम्।

तत्र आत्मा तु द्विविधो जीवात्मा परमात्मा चेति। प्रतिशरीरभेदेन जीवात्मा तु नाना परन्तु परमात्मा एक एव। जीवात्मनो भोगायतनं शरीरमुच्यते। ज्ञानसाधनानि करणानीन्द्रियाणि इति। अर्थस्तु द्रव्यगुणादय, इच्छाद्वेषमिथ्याज्ञानानि दोषास्सन्ति। अतीन्द्रियं मनः अणुनित्य०चेति। अर्थज्ञानं बुद्धिरूच्यते। प्रवृत्तिस्तु धर्माधर्मयागादयः सन्ति। पीड़ातापादीनि दुःखानि सन्ति। अपवर्गस्तु मोक्ष इत्युच्यते।

रूपादिरहितत्त्वात् नैयायिकाः ईश्वरं तु अतीन्द्रियं मन्यन्ते। ईश्वरः प्रत्यक्षेण न सिध्यति किन्त्वनुमानेन। यथा कर्तुरभावे कार्यस्याभावात् तथा जगद्रूपकार्यं तावत् सर्वज्ञाभावे भवितुं नार्हतीति। तथाहि यथा घटादिकार्यं कर्तृजन्यं तथा क्षित्य– ङ्कुरादिकमपि। विषयेऽास्मिन् श्रुतिप्रामाण्यमपि वर्तते –

एको देवः सर्वभूतेषु गूढ़ सर्वव्यापी सर्वभूतान्तरात्मा।
कर्माध्यक्षः सर्वभूताधिवासी साक्षी चेता केवलो निर्गुणश्च।।[4]

इदं जगत् सर्वज्ञेन जीवानां कर्मफलभोगाय परमाणुभिः विरचितम्। परमाणुनां संयोगः विप्रयोगश्च ईश्वरेच्छया भवति। अतः ईश्वरः जगत् प्रति निमित्तकारणमस्ति न्यायमते। अनया दृष्टया एवं वक्तुं शक्यते यत् न्यायदर्शनं तावद्वस्तुवादिदर्शनं द्वैतवादि चाऽस्ति।

वैशेषिकदर्शनकारस्तु तत्रभवान् महर्षिकणादः। न्यायवैशेषिकयोः सिद्धान्ते महदन्तरं नास्ति। न्यायदर्शनापेक्षया अत्र विशेषनामकः पदार्थः कल्पितः। येन नित्येषु पदार्थेषु परमाणुषु च भिन्नतायाः सिद्धिर्भवतीति। पदार्थस्तावत् ज्ञेयत्वाभिधेयत्व– लक्षणोऽस्ति। द्रव्यगुणकर्मादयः वैशेषिकानां मते सप्तपदार्थाः। एषु पदार्थेषु जगत् सर्वं समाविष्टमस्ति। अनेकेषु विषयेषु न्यायवैशेषिकयोः साम्यमस्ति। आत्मविषये यथा यस्मिन् समवायसम्बन्धेन ज्ञानमस्ति स आत्मा। स्वात्मा तु प्रत्यक्षः परमात्मा अनुमानेन ज्ञायते। क्षेत्रज्ञस्तु जीवः सर्वज्ञस्तु ईश्वरः। प्रमाणे प्रत्यक्षानुमाने स्तः। शब्दस्तु अनुमानान्तः उपमानं तु शब्दान्तर्गतमिति। पृथिवीजलतेजवाय्व्याकाशकालादिगात्ममनांसि इति नवद्रव्याणि। एतेषां सप्तपदार्थानां नवद्रव्याणां च तत्त्वज्ञानमेव मोक्षसाधनम्। 'यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः' इति धर्ममूलेनैव तत्त्वज्ञानं सम्पद्यते। तत्त्वज्ञानं तु पदार्थानां साधर्म्यवैधर्म्यज्ञानेन भवति।

तत्रभवान् कपिलः सांख्यदर्शनस्योपदेष्टा। दर्शनेऽस्मिन् आधिभौतिकाधिदै– विकाध्यात्मिकतापत्रयोपायाः विस्तरे प्रतिपादिताः। अत्र द्वे तत्त्वे स्तः। प्रकृतिः पुरूषश्चेति। उभावपि निरपेक्षस्वसत्तावन्तौ स्तः। तत्र पुरूषस्तु चेतनः प्रकृतिर्जड़ात्मिका त्रिगुणात्मिकेति। पुरूषो नित्योऽपरिणामी चाऽस्ति। प्रकृतिस्तु एका सा संसारस्य मूलभूता चाऽस्ति। सांख्यमते प्रकृतिः परिणामिनीति मन्यते। अस्यां त्रिगुणात्मिकायां प्रकृतौ यावद् गुणसाम्यमस्ति तावत् सृष्टिर्न यदा गुणक्षोभोपजायते तदा कार्याणि समुत्पद्यन्ते। शास्त्रेऽस्मिन् प०चविंशति तत्त्वानि स्वीकृतानि सन्ति। एते सत्कार्यवादिनः कार्यं तावद् कारणादतिरिक्तं नास्तीति मन्यन्ते। गीतायामपि–नासतो विद्यते भावो नाभावो विद्यते सतः इत्येवं रूपेण सत्कार्यवादो विशदतां नीतः। सांख्याचार्यैः प्रमाणत्रये स्वीक्रियते–प्रत्यक्षम्, अनुमानम्, शब्दश्चेति। उपमानार्थापत्त्यभावादिप्रमाणानां प्रमाणत्वं सांख्याचायैः नोरीक्रियते। सांख्यमते पुरूषप्रकृतिसंयोगेन सृष्टिर्जायते। सृष्टिक्रमे सर्वप्रथमं महतः उत्पत्तिर्जायते, ततोऽहंकारस्य, ततश्च ज्ञानेन्द्रियाणि, कर्मेन्द्रियाणि च समुत्पद्यन्ते। अहंकारादेव प०चतन्मात्राणि, ततः प०चमहाभूतानि समुत्पद्यन्ते। सांख्या निरीश्वरवादिनः सन्ति। सांख्याभिमते प्रकृतिपुरूषयोस्तत्त्वज्ञानेनैव यत् त्रिविधदुःखात्यन्तनिवृत्तिरूपं मोक्षपदं लभ्यते तदेव मानव जीवनस्य परमप्रयोजनम्।

महाभाष्यकारः तत्रभवान् भगवान् पत०जलिः योगसूत्रकारः। सांख्ययोगयो–र्विलक्षणं साम्यमस्ति। अतएव कथितं भगवदगीतायां –

यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते।
एकं सांख्यं च योगं च यः पश्यति स पश्यति।।[5]

केषुचित् स्थलेषु भिन्न्ताऽपि प्रतिपादिता। सांख्याभिमतानि प०चविंशतिः तत्त्वानि योगेऽपि स्वीक्रियन्ते। विवेकज्ञानमेव मुक्तिसाधनमेतदेवोभयत्र मन्यते। ईश्वर–विषये सांख्या निरीश्वरवादिनः, योगिनस्तु सेश्वरवादिनः सन्ति। योगदर्शनानुसारेण ईश्वरः सर्वश्रेष्ठात्मा, सर्वेषामुपरि सर्वदोषशून्यश्चास्ति। स सम्पन्नः नित्यः सर्वव्यापी, सर्वद्रष्टा शक्तिमांश्चास्ति। ईश्वरसिद्धौ श्रुतिस्मृत्यादीनि परमं प्रमाणं मन्यन्ते। भगवता पत०जलिना 'योगश्चित्तवृत्तिर्निरोधः' इति सूत्रे योगं लक्षयित्वा पुनश्चित्तवृत्ति निरोधोपायरूपेण अष्टाङ्गयोगो वर्णितः। अनेन अष्टाङ्गयोगसाधनेन साधकः स्वचित्तवृत्तिनिरोधादैकान्तिकं सुखं विन्दति मोक्षं चाधिगच्छति। अतएव योगदर्शने ईश्वरमुदिश्य वैराग्येनाग्रेसरेदिति विशेषरूपेण प्रतिपादितमस्ति।

पूर्वमीमांसादर्शनस्योपदेष्टा तु तत्रभवान् महामुनिर्जैमिनिः। धर्मस्य विवेचनं मीमांसायाः प्रमुखो विषयः। 'चोदना लक्षणोऽर्थो धर्मः' इत्यस्मिन् सूत्रे जैमिनिमुनिना धर्मस्य लक्षणं प्रतिपादितम्। मीमांसकाः कर्मप्रतिपादिकाः सन्ति। अतएव मीमांसायां कर्मणां महत्त्वं महनीयतया स्वीकृतम्। आम्नायस्य क्रियार्थत्वात् आनर्थक्यमतदर्थानाम[6] इति मीमासकैः सर्वेषां वेदवाक्यानां कर्मपरतया अर्थः क्रियते। अत्र नित्य नैमित्तिककाम्यनिषिद्वानि चत्वारिकर्माणि स्वीकृतानि। मीमांसानुसारं नित्यनैमित्तिक प्रायश्चित्तानीति त्रीणि कर्माणि पापक्षयाय सदैव करणीयानि। काम्येन कर्मणा भोक्तृत्वमायातीति मीमांसापक्षः। निषिद्धानि तावत् सर्वदा परित्यजेदिति तेषां सिद्धान्तः। वेदास्तावदपौरूषेया इति मीमांसादर्शनस्य सिद्धान्तः। दर्शनेऽस्मिन् स्वकीय– प्रमाणशास्त्रमस्ति येन तैरन्येषां दार्शनिकानां मतं खण्डितम्। जगत्प्रति एते यथार्थवादिनः सन्ति। यथा नदीप्रवाहरूपेण नित्या परिणामिजलरूपेणावस्थान्तरं गच्छति तथैव इदं जगन्नित्यं परिणामि चाऽस्ति। वेदानां तु स्वतो नित्यत्वात् ईश्वरस्य कामपि आवश्यकतां मीमांसकाः नैव मन्यन्ते। प्राचीनमीमांसकास्तु कर्म एव ईश्वरस्थानीयं स्वीचक्रुः। किन्तु अर्वाचीनाः कर्मफलाध्यक्षरूपेण ईश्वरं पृथक्तया प्रकल्पयामासुः। मीमांसानुसारं निष्कामभावेन ईश्वरार्पणबुद्ध्या कर्माणि कुर्वन् मानवो मोक्षमाप्नोति।

शारीरकसूत्रकारः भगवान् बादरायणः वेदान्तदर्शनस्योपदेष्टा। सर्वाण्युपनिषद्वाक्यानि विचार्य महर्षिरेषः ब्रह्मसूत्राणि रचयामास। दर्शनेऽस्मिन् सर्वप्रथमं अद्वैततत्त्वप्रतिपादका श्रीमच्छंकरभगवत्पादा भाष्यकारा बभूवुः। श्रीमच्छंकराचार्यं विहाय वेदान्तसम्प्रदाये भास्कराचार्यरामानुजमध्वनिम्बार्कवल्लभप्रभृतय अन्येऽपि भाष्यकाराः बभूवुः। तत्र ते क्रमशः भेदाभेद–विशिष्टाद्वैत–द्वैत–द्वैताद्वैत–शुद्धाद्वैतान् प्रतिष्ठापितवन्तः। एतेषु सर्वेषु वादेषु माध्वाचार्यं विहाय अन्ये सर्वे भाष्यकाराः येन केनापि प्रकारेण अद्वैतमिति उक्त्वा स्वीयसिद्धान्तान् विचारयामासुः। अर्थात् माध्वाचार्यं परित्यज्य केनापि अद्वैतस्य खण्डनं तत्त्वतो नैव कृतम्। अद्वैतवेदान्तानुसारमखण्डं सच्चिदानन्दं ब्रह्मैवैकमद्वितीयं तत्त्वं जगदिदं मिथ्या। जीवोऽपि तत्त्वतः ब्रह्मैव नान्यत्– ब्रह्म सत्यं जमन्मिथ्या जीवो ब्रह्मैव नापरः

किं सत्यं किमसत्यं वा इति जिज्ञासायां श्रीशंकरोऽभिधत्ते यद् वस्तु शाश्वतिकं परिवर्तनरहीतमविनश्वर०च तत् सत्यम्, अतोऽन्यत् असत्यं मिथ्वा वा। वेदातानुसारं मायानाम्नी ब्रह्मणः या विलक्षणा अनिर्वचनीया च शक्तिरस्ति तया शक्त्या एकस्मिन्नेव ब्रह्मणि नानारूपात्मकस्य जगतः भ्रान्तिस्तथैव जन्यते यथा रज्जौ सर्पत्वभ्रान्तिः। इत्थं वेदान्तदर्शने ब्रह्मणः विवर्तमेव जगत्। वेदान्ताभिमते यदा तत्त्वज्ञानेन अज्ञानस्यावरणं छिन्नं जायते तदा जीवः 'तत्त्वमसीति' महावाक्येन जीवब्रह्मणोरैक्यं अर्थात् स्वस्वरूपं परिचिनोति। साधकः साधनापद्धतिमनुसरन् श्रवणमनननिदिध्यासनेन अद्वैतब्रह्मणः साक्षात्कारं विदधाति। ब्रह्मणि साक्षात्कृते 'अहं ब्रह्मास्मि' इत्येतद् महावाक्यं चरितार्थतां याति।

एवमास्तिकदर्शनानि विवेचनगाम्भीर्येण, जीवनोन्नायकत्वेन, दुःखत्रय विनाशपूर्वकब्रह्मसाक्षात्कारकरणत्वेन समेषामपि सुधियां तृप्तिं समधिगच्छन्ति।

## सन्दर्भ सूची

1. बृहदारण्यक – 2.4.5
2. मनुस्मृति – 2/6
3. म.भा.भा.दं. पृष्ठ 52
4. श्वेताश्वतशेषनिषद् – 6/11
5. गीता – 5/5
6. जैमिनीसूत्रम् – 1/2/6